# শ্রীবিষ্ণুভুজঙ্গপ্রযাতস্তোত্রম্

{॥ শ্রীবিষ্ণুভুজঙ্গপ্রযাতস্তোত্রম্ ॥}

চিদংশং বিভুং নির্মলং নির্বিকল্পং

নিরীহং নিরাকারমোঙ্কারগম্যম্ ।

গুণাতীতমব্যক্তমেকং তুরীযং

পরং ব্রহ্ম যং বেদ তস্মৈ নমস্তে ॥ ১॥

বিশুদ্ধং শিবং শান্তমাদ্যন্তশূন্যং

জগজ্জীবনং জ্যোতিরানন্দরূপম্ ।

অদিগ্দেশকালব্যবচ্ছেদনীযং

ত্রযী বক্তি যং বেদ তস্মৈ নমস্তে ॥ ২॥

মহাযোগপীঠে পরিভ্রাজমানে

ধরণ্যাদিতত্ত্বাত্মকে শক্তিযুক্তে ।

গুণাহস্করে বহ্নিবিম্বার্ধমধ্যে

সমাসীনমোঙ্কর্ণিকেঽষ্টাক্ষরাব্জে ॥ ৩॥

সমানোদিতানেকসূর্যেন্দুলোটি-

প্রভাপূরতুল্যদ্যুতিং দুর্নিরীক্ষম্ ।

ন শীতং ন চোষ্ণং সুবর্ণাবদাত-

প্রসন্নং সদানন্দসংবিৎস্বরূপম্ ॥ ৪॥

সুনাসাপুটং সুন্দরভ্রূললাটং
কিরীটোচিতাকুঞ্চিতস্নিগ্ধকেশম্ ।
স্ফুরৎপুণ্ডরীকাভিরামাযতাক্ষং
সমুৎফুল্লরত্নপ্রসূনাবতংসম্ ॥ ৫॥

লসৎকুণ্ডলামৃষ্টগণ্ডস্থলান্তং
জপারাগচোরাধরং চারুহাসম্ ।
অলিব্যাকুলামোলিমন্দারমালং
মহোরস্ফুরৎকৌস্তুভোদারহারম্ ॥ ৬॥

সুরত্নাঙ্গদৈরন্বিতং বাহুদণ্ডৈ-
শ্চতুর্ভিশ্চলৎকঙ্কণালংকৃতাগ্রৈঃ ।
উদারোদরালংকৃতং পীতবস্ত্রং
পদদ্বন্দ্বনির্ধূতপদ্মাভিরামম্ ॥ ৭॥

স্বভক্তেষু সন্দর্শিতাকারমেবং
সদা ভাবযন্সংনিরুদ্ধেন্দ্রিযাশ্বঃ ।
দুরাপং নরো যাতি সংসারপারং
পরস্মৈ পরেভ্যোঽপি তস্মৈ নমস্তে ॥ ৮॥

শ্রিযা শাতকুম্ভদ্যুতিস্নিগ্ধকান্ত্যা
ধরণ্যা চ দূর্বাদলশ্যামলাঙ্গ্যা ।

কলত্রদ্বয়েনামুনা তোষিতায়

ত্রিলোকীগৃহস্থায় বিষ্ণো নমস্তে ॥ ৯॥

শরীরং কলত্রং সুতং বন্ধুবর্গং

বয়স্যং ধনং সদ্ম ভৃত্যং ভুবং চ ।

সমস্তং পরিত্যজ্য হা কষ্টমেকো

গমিষ্যামি দুঃখেন দূরং কিলাহম্ ॥ ১০॥

জরেয়ং পিশাচীব হা জীবতো মে

বসামক্তি রক্তং চ মাংসং বলং চ ।

অহো দেব সীদামি দীনানুকম্পি-

ন্কিমদ্যাপি হন্ত ত্বয়োদাসিতব্যম্ ॥ ১১॥

কফব্যাহতোষ্ণোল্বণশ্বাসবেগ-

ব্যথাবিস্ফুরৎসর্বমর্মাস্থিবন্ধাম্ ।

বিচিন্ত্যাহমন্ত্যামসংখ্যামবস্থাং

বিভেমি প্রভো কিং করোমি প্রসীদ ॥ ১২॥

লপন্নচ্যুতানন্ত গোবিন্দ বিষ্ণো

মুরারে হরে নাথ নারায়ণেতি ।

যথানুস্মরিষ্যামি ভক্ত্যা ভবন্তং

তথা মে দয়াশীল দেব প্রসীদ ॥ ১৩॥

ভুজঙ্গপ্রযাতং পঠেদ্যস্তু ভক্ত্যা

সমাধায চিত্তে ভবন্তং মুরারে ।

স মোহং বিহাযাশু যুষ্মৎপ্রসাদা-

ৎসমাশ্রিত্য যোগং ব্রজত্যচ্যুতং ত্বাম্ ॥ ১৪॥

ইতি শ্রীমৎপরমহংসপরিব্রাজকাচার্যস্য

শ্রীগোবিন্দভগবৎপূজ্যপাদশিষ্যস্য

শ্রীমচ্ছঙ্করভগবতঃ কৃতৌ

শ্রীবিষ্ণুভুজঙ্গপ্রযাতস্তোত্রং সম্পূর্ণম্ ॥

Encoded by Sunder Hattangadi sunderh@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Vishnu Bhujangaprayata Stotram Lyrics in Bengali PDF
% File name : vishnubhujanga.itx
% Category : bhujanga
% Location : doc_vishhnu
% Author : Adi Shankaracharya
% Language : Sanskrit
% Subject : hinduism/religion
% Transliterated by : Sunder Hattangadi sunderh at hotmail.com
% Proofread by : Sunder Hattangadi sunderh at hotmail.com
% Translated by : -
% Description-comments : Hymn of 8 verses in praise of the Vishnu

% Latest update : August 24, 2002
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website